नामके धुस्तुरे च अमरकोषः। ४स्वर्णनिर्मिते त्रिलिङ्गः।

**हाटकेश्वर** पु॰गोदावरीतीरस्थे शिवलिङ्गभेदे यथा "एतस्मिन्नन्तरे प्राप्ताः सर्वे एवर्षिपार्थिवाः। द्रष्टुं त्रैलोक्यभर्त्तारं त्र्यम्बकं हाटकेश्वरम्। ततः कपिवरः प्राप्तो ह्यनाथ्या सह सुन्दरि!। स्नात्वा गोदावरीतीर्थे ददृशुर्हाटकेश्वरम्" वामनपु॰ ६२अ॰।

**हात** न॰ हा-करणे त्तन्। वेतने सि॰ कौ॰। पृषो॰। हान्त। मरणे उणादि॰। [क्वचन" भट्टिः।

**हान** न॰ हा-भावे क्त। परित्यागे "हिमहानकृता न कृता

**हानि** स्त्री हा-क्तिन् तस्य निः। १क्षतौ २अपचये च जटा॰।

**हापुत्री** स्त्री हा इति रवः पुत्राय यस्याः ङीप्। पक्षिभेदे हारा॰। स्वार्थे क ह्रस्वः। तत्रार्थे त्रिका॰।

**हायन** पु॰ अव्द जहाति हा-ल्युट्-नि॰। १व्रीहौ भावं जहाति हा-ल्यु-नि॰। २वत्सरे पुंस्त्री॰ अमरः। ३अग्निशिखायां स्त्री मेदि॰।

**हार** पु॰ हृ-कर्मणि घञ्। १मुक्तामालाभेदे अमरः "हारो नारोपितः कण्ठे" इति सीतावाक्यम्। २युद्धे मेदि॰। हरतीति कर्त्तरि घञ् ण वा। ३भाजके "अन्योन्यहाराभिहतौ हरांशौ" इति लीला॰।

**हाफिका** स्त्री जृम्भायां (हाइतोला) हारा॰।

**हारक** पु॰ हृ-ण्वुल्। १चौरे २कितवे ३गद्यभेदे ४विज्ञानभेदे मेदि॰। ५शाखोटकभेदे शब्दच॰। ६भाजकाङ्के च। ७हरणकर्त्तरि त्रि॰। [कपिलद्राक्षायाम् राजनि॰

**हारहारा** स्त्री हार इव हरति आस्वादनात् हृ-ण।

**हारहूरा** स्त्री ह्वे-क्विप् हूः हार इव हूवं राति रा-क। १द्राक्षायाम् हला॰। २मद्ये पु॰ मेदि॰।

**हारावली** स्त्री हार इवावली। मुक्तावल्यां "शृङ्गारहारावली" इति शब्दार्णवः। २पुरुषोत्तमकृते कोषभेदे च।

**हारि(री)** स्त्री हृ-णिच्-इन् वा ङीप्। १द्यूतादिभङ्गे २तत्पराजये ३पथिकसमूहे च मेदि॰। ङीबन्तः ४मुक्तायां स्त्री शब्दमा॰। [कोकिले मेदि॰ स्त्रियां ङीष्।

**हारिकण्ठ** पुंस्त्री॰ हारी मनोहरः कण्ठस्तद्रवो यस्य।

**हारित** पुंस्त्री॰ हृ-णिच्-क्त। हारीते पक्षिभेदे जटा॰ स्त्रियां ङीष्। हरिदेव स्वार्थे अण्। हरिद्वर्णे पु॰।

**हारितक** न॰हारितेन हरिद्वर्णेन कायति कै-क। शाके शब्दर॰

**हारिद्र** पु॰ हरिद्रया रक्तः अण्। १कदम्बवृक्षे तत्पुष्पस्य पीतप्रायत्वात् तथात्वम्। २हरिद्रया रक्ते त्रि॰मेदि॰।

**हारिन्** त्रि॰ हारोऽस्त्यस्य इनि हृ-णिनि वा। १हारके २हारविशिष्टे ३मनोहारिणि च। "हारीण्यबलानां हारीण्यबलानाम्" भट्टिः। स्त्रियां ङीप्।

**हारिल** पुंस्त्री॰ हृ-णिच् इलच्। खनामख्याते खगभेदे राजनि॰ स्त्रियां जातित्वात् ङीष्।

**हारीत** पु॰ हृ-णिच्बा॰-ईतच्। स्मृतिकर्त्तरि मुनिभेदे। २पक्षिभेदे ३कितवे च मेदि॰। स्वार्थे क। हारिलखगे (हरेल) राजनि॰।

**हार्द** न॰ हृदयस्य कर्म युवा॰ अण् हृदादेशः। १स्नेहे २प्रेमणि अमरः। हृदि भवः विदितो वा अण्। ३हृदयस्थे ४हृदयवेद्ये च त्रि॰ हार्दविद्या शा॰भा॰।

**हार्य्य** पु॰ ह्रियतेऽसौ हृ-ण्यत्। १विभीतकवृक्षे २हरणीये त्रि॰ मेदि॰।

**हाल** पु॰ हलोऽस्त्यस्य अण् हल एव वा अण्। १बलरामे त्रिका॰। २हले च मेदि॰। ३शालिवाहननृपे हेमच॰।

**हालक** पु॰हाल+संज्ञायां कन्। पीतहरितवर्णाश्वे हेमच॰।

**हालह(हा)ल** न॰हलाहल पृषो॰। हालाहलविषे शब्दर॰

**हाला** स्त्री हल-घञ्। १मद्ये अमरः २तालरसजे (ताड़ि) मद्ये च राजनि॰।

**हालाहल** पुंन॰हालेव हलति हल-अच्। १स्थावरविषभेदे शब्दर॰। २कीटभेदे च पु॰ राजनि॰। २मद्ये स्त्री तत्र ङीष् राजनि॰। "गोस्तनाभफलो गुच्छस्तालपत्रच्छदस्तथा। तेजसा यस्य दह्यन्ते समीपस्था द्रुमादयः। असौ हालाहलो ज्ञेयः किष्किन्धायां हिमालये। दक्षिणाब्धितटे देशे कोङ्कणेऽपि च जायते" भावप्र॰।

**हालिक** त्रि॰ हलेन खनति हलः प्रहरणमस्य तस्येदं वा ठक् ठञ् वा। १हलकर्षके २हलेन योद्धरि ३हलसम्बन्धिनि च अमरः।

**हालिनी** स्त्री हल-णिनि ङीप्। स्थूलपत्र्यां हेमच॰।

**हाली** स्त्री हल-इण् ङीप्। कनिष्ठायां श्यालिकायाम् हेमच॰।

**हालु** पु॰ हल-उण्। दन्ते त्रिका॰।

**हाव** पु॰ ह्वे-भावे घञ् नि॰सम्प्र॰हु-करणे घञ्। १आह्वाने २स्त्रीणां शृङ्गारभावजे चेष्टाभेदे च अमरः। "युवा-लोऽनेन हूयन्ते नारीभिर्मदनानले। अतो निरुच्यते हावस्ते विलासादयो मताः" भरतधृतवाक्यम्। "ग्रीवारेचकसंयुक्तो भ्रूनेत्रादिविकाशकृत्। भावादीषत्प्रकाशो यः स हाव इति कथ्यते" उज्ज्वलमणिः।

**हास** पु॰हस-भावे घञ्। हास्यस्थायिभावके रसभेदे तत्स्वरूपं